कटुस्नेह: ५ यवन: ६ कटुक: ७ राजिकाफल: ८ तीक्ष्णक: ९ दुराधर्ष: १० रक्तोम: ११ कुलनाशन: १२ सिद्धप्रयोजन: १३ सिद्धसाधन: १४ चितसर्षप: १५ । अस्य गुणा: । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातरक्तग्रहव्रणदोषविषभूतव्रणनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्ट: ॥ रूक्षत्वम् । तीक्ष्णत्वम् । कफरक्तकण्डूकुष्ठकोठक्रमिनाशित्वम् । रक्तपित्ताग्निवर्द्धनत्वञ्च । इति भावप्रकाश: ॥ (परिमाणविशेष: । यथा, मनु: । ८ । १३३ ।
"त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणत: ।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षप: ॥")
गौरसुवर्णं, क्ली, (गौर: शुभ्र: अतएव सु शोभनो वर्णो यस्य ।) पत्रशाकविशेष: । तत्तु चित्रकूटदेशे प्रसिद्धम् । तत्पर्य्याय: । स्वर्णम् २ सुगन्धिकम् ३ भूमिजम् ४ वारिजम् ५ हस्तम् ६ गन्धशाकम् ७ कटुश्लेष्मम् ८ सूर्णशाकाङ्क: ९ । अस्य गुणा: । शिशिरत्वम् । कफपित्तज्वरदाहहरविभ्रान्तिरक्तश्रमनाशित्वम् । पथ्यत्वञ्च । इति राजनिर्घण्ट: ॥
गौरा, स्त्री, (गौरादिगणे वर्णवाचिन एव गौरशब्दस्य ग्रहणात् अत्र विशुद्धार्थपरत्वे टाप् ।) गौरी । इति द्विरूपकोष: ॥
गौराङ्ग:, पुं, (गौरं तप्तकाञ्चनवर्णं अङ्गं कलेवरं यस्य ।) श्रीचैतन्यदेव: । यथा,—
"गौराङ्गं गौरदीप्ताङ्गं पठेत् स्तोत्रं कृताञ्जलि: ।
नन्दगोपसुतञ्चैव नमस्यामि गदाग्रजम् ॥"
इति ब्रह्मयामले चैतन्यकल्पे चैतन्यस्तव: ॥
अपि च कृष्णयामले ।
"गौराङ्गो नादगम्भीर: स्वनामामृतलालस: ॥"
गौरार्द्रक:, पुं, (गौरवर्णं आर्द्रकम् इव ।) स्थावरविषभेद: । इति हेमचन्द्र: । ४ । २६४ ॥
गौरास्य:, पुं, (गौरं शुक्लवर्णं आस्यं मुखं यस्य ।) कृष्णवानर: । इति राजनिर्घण्ट: ॥
गौरिका, स्त्री, (गौर्य्येव । गौरी + स्वार्थे कन् । ह्रस्वश्च ।) अष्टवर्षीया कन्या । इति शब्दरत्नावली ॥
गौरिल:, पुं, (गौरवर्णोऽस्यास्तीति । गौर + बाहुलकादिलच् ।) श्वेतसर्षप: । लौहचूर्णम् । इति मेदिनी । ८७ ॥
गौरी, स्त्री, (गौर + "षिद्गौरादिभ्यश्च ।" ४ । १ । ४१ । इति ङीष् ।) पार्व्वती । (यथा, रघु: । २ । २६ ।
"गौरीगुरोर्गह्वरमाविवेश ॥"
पार्व्वती किल गौरीमूर्त्त्या पीठस्थाने कान्यकुब्जे विराजते । यथा, देवीभागवते । ७।३०।५८ ।
"गौरी प्रोक्ता कान्यकुब्जे रम्भा तु मलयाचले ॥")
असञ्जातरज:कन्या । (सा तु अष्टवर्षवयस्ककन्यका । यदुक्तं स्मृतौ ।
"अष्टवर्षा भवेद् गौरी नववर्षा तु रोहिणी ॥"
तथा च महाभारते । १ । २२२ । ४७ ।
"स्त्रीणां सहस्रं गौरीणां सुवेशानां सुवर्च्चसाम् ॥")
हरिद्रा । दारुहरिद्रा । गोरोचना । प्रियङ्गुवृक्ष: । वसुधा । नदीविशेष: । (यथा, महाभारते । ६ । ९ । २५ ।
"वस्त्रं सुवर्णां गौरीञ्च किम्पुनां सहिरण्वतीम् ॥"
गङ्गा । यथा, काशीखण्डे । २९ । ४९ ।
"गङ्गा गन्धवती गौरी गन्धर्व्वनगरप्रिया ॥")
वरुणभार्य्या । इति मेदिनी । रे । २८—२९ ॥
सूर्य्यवंशीयप्रसेनजिद्राजभार्य्या । यथा,—
"लेभे प्रसेनजिद्भार्य्यां गौरीं नाम पतिव्रताम् ।
अभिशस्ता तु सा भर्त्रा नदी वै बाहुदाऽभवत् ॥"
इति हरिवंश: ॥
बुद्धशक्तिविशेष: । इति हेमचन्द्र: ॥ मञ्जिष्ठा । श्वेतदूर्व्वा । मल्लिका । तुलसी । सुवर्णकदली । आकाशमांसी । इति राजनिर्घण्ट: ॥ रागिणीविशेष: । सा तु मालवरागपत्नी । तस्या रूपं यथा, सङ्गीतदामोदरे ।
"आराममध्यगता कुमारिका शारदेन्दुसुखलक्ष्मी: ।
राज्ञी दाड़िमबीजं दधती कीराणने गौरी ॥"
(केषाञ्चित् मते तु इयं कौशिकरागस्य पत्नी । यदुक्तं सङ्गीतदर्पणे रागाध्याये । ३३ ।
"तोड़ी खाम्बावती गौरी गुणक्री ककुभा तथा ।
रागिण्यो रागराजस्य कौशिकस्य वराङ्गना: ॥"
केषाञ्चित् मते इयं श्रीरागस्य पत्नी । यदुक्तं तत्रैव रागाध्याये । १४ ।
"मालश्री त्रिवणी गौरी केदारी मधुमाधवी ।
तत: पाहाड़िका ज्ञेया श्रीरागस्य वराङ्गना: ॥"
अस्या रागवेला तृतीयप्रहरात् परं अर्द्धरात्रावधि: ॥)
गौरीजं, क्ली, (गौर्य्या जायते इति । जन + ड: ।) अभ्रकम् । इति राजनिर्घण्ट: ॥
गौरीपुत्त्र:, पुं, (गौर्य्या: पुत्त्र: ।) कार्त्तिकेय: । इति हलायुध: ॥
गौरीपुष्प:, पुं, (गौरीप्रियं पुष्पमस्य ।) प्रियङ्गुवृक्ष: । इति राजनिर्घण्ट: ॥
गौरीललितं, क्ली, (गौरीव हरिद्रेव ललितम् । पीतवर्णत्वादस्य तथात्वम् ।) हरितालम् । इति राजनिर्घण्ट: ॥
गौरुतल्पिक:, पुं, (गुरुतल्पं गुरुशय्यां गुरुपत्नीमित्यर्थ: गच्छतीति । "गच्छतौ परदारादिभ्य: ।" ४ । ४ । १ । इत्यस्य वार्त्ति इति ठक् ।) गुरुपत्नीगामी । इति प्रायश्चित्तप्रकरणे धर्म्मशास्त्रम् ॥
गौलिक:, पुं, (गुड़ं साधु: । गुड़ + ठक् । डस्य लत्वम् ।) मुष्ककवृक्ष: । इति राजनिर्घण्ट: ॥
गौल्यं, क्ली, (गुड़स्य भाव: । गुड़ + ष्यञ् । डस्य लत्वम् ।) मधुरम् । इति राजनिर्घण्ट: ॥
गौशतिक:, त्रि, (गोशतमस्यास्तीति । गोशत + "एकगोपूर्व्वात् ठञ् नित्यम् ।" ५ । २ । ११८ । इति ठञ् ।) गोशतस्वामी । इति व्याकरणम् ॥ याहार एक शत गरु आछे इति भाषा ॥
गौष्ठीनं, क्ली, (पूर्व्वं भूतं गोष्ठम् । गोष्ठ + "गोष्ठात् खञ् भूतपूर्व्वे ।" ५ । २ । १८ । इति खञ् ।) भूतपूर्व्वकगोस्थानम् । इत्यमर: । ३ । १ । १३ ॥ पूर्व्वेर गोठ इति भाषा ॥ (यथा, भट्टि: । ४ । २१ ।
"तामुवाच स गौष्ठीने वने स्त्रीपुंसभीषणे ॥")
ग्रथ, इ ङ कौटिल्ये । इति कविकल्पद्रुम: ॥ (भ्वां-आत्मं-अकं-सकं च-सेट् ।) रेफयुक्त: । कौटिल्यमिह कुटिलीभाव: कुटिलीकरणञ्च । इ, कर्म्मणि ग्रन्थ्यते । ङ, ग्रन्थते काष्ठं कुटिलं स्यादित्यर्थ: । ग्रन्थते लतां वायु: कुटिलां करोतीत्यर्थ: । इति दुर्गादास: ॥
ग्रथितं, त्रि, (ग्रथ्यते स्म इति । ग्रन्थ श दर्भे + क्त: । ततो न लोप: ।) कृतग्रन्थनम् । गाँथा इति भाषा । तत्पर्य्याय: । ग्रन्थितम् २ दृब्धम् ३ । इत्यमर: । ३ । १ । ८६ ॥ गुम्फितम् ४ । (यथा, रघु: । ८ । ३४ ।
"कुसुमैर्ग्रथितामपार्थिवै:
स्रजमातोद्यशिरोनिवेशिताम् ॥")
आक्रान्तम् । हिंसितम् । इति मेदिनी । ते । १०६ ॥
ग्रन्थ, कि श दर्भे । इति कविकल्पद्रुम: ॥ (चुरां-पक्षे भ्वां-क्र्यां च-परं-सकं-सेट् ।) रेफयुक्त: । दर्भो ग्रन्थनम् । कि, ग्रन्थयति ग्रन्थति । श, ग्रथ्नाति मालां मालिक: । ग्रन्थिमुद्ग्रथयितुं हृदयेश: । इति माघे चिन्त्यम् । इति दुर्गादास: ॥
ग्रन्थ:, पुं, (ग्रन्थ श दर्भे + भावे घञ् ।) गुम्फ: । ग्रन्थना । धनम् । (ग्रथ्यते विरच्यते इति । ग्रन्थ + कर्म्मणि घञ् ।) शास्त्रम् । (यथा, महाभारते । १ । १ । ८० ।
"ग्रन्थग्रन्थिं तदा चक्रे मुनिर्गूढ़ं कुतूहलात् ॥")
द्वात्रिंशद्वर्णनिर्म्मिति: । अनुष्टुप्छन्द:श्लोक: । इति हेमचन्द्र: ॥
ग्रन्थकर्त्ता, [ऋ] त्रि, ग्रन्थं करोतीति । कृ + तृच्-प्रत्यय: । ग्रन्थकार: । पुस्तककारक: । शास्त्रकृत् ॥
ग्रन्थकुटी, स्त्री, (ग्रन्थस्य कुटी गृहादिस्थानम् ।) लेख्यस्थानम् । इति त्रिकाण्डशेष: ॥
ग्रन्थनं, क्ली, (ग्रन्थ + भावे ल्युट् ।) गुम्फनम् । ग्रन्थना । तत्पर्य्याय: । सन्दर्भ: २ रचना ३ गुम्फ: ४ श्रन्थनम् ५ । इति हेमचन्द्र: ।३।३१७॥
ग्रन्थना, स्त्री, (ग्रन्थ + भावे युच् । स्त्रियां टाप् ।) ग्रन्थनम् । इति मुग्धबोधम् ॥
ग्रन्थि:, पुं, (ग्रन्थ श सन्दर्भे + "खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचरिभ्यश्च ।" उणां । ४ । १३९ । इति भावकरणादौ यथायथं इ: ।) वंशादिसन्धि: । गाँटि इति भाषा । तत्पर्य्याय: । पर्व्व २ परु: ३ । इत्यमर: । २ । ४ । १६२ ॥ कालसन्धि: ४ । (यथा, आर्य्यासप्तशत्याम् ।१६८।
"दृशोरिव सुन्दरि ! मानस्य ग्रन्थिरपि काम्य: ॥")
भद्रमुस्ता । हिङ्गावली । पिण्डालु: । इति राजनिर्घण्ट: ॥ (अन्योन्याध्यास: । मायापाश: । यथा, भागवते । १ । २ । २१ ।